क्रम सं० १०

प्रवेश सं० २९५५४ 　　विषयः कर्मकाण्डम्

ग्रन्थकार

नाम नागवलिः (बौधायनोक्तः)

पत्र सं० १-४

श्लोक सं० 　　अक्षर सं० (पंक्तौ) ४० 　　पंक्ति सं० (पृष्ठे) ७

आकारः ८.७.×३.५. 　　लिपिः दे.ना. 　　आधारः का.

वि० विवरणम् पू. 　　ना: ३ ७२/११६

पी० एस० यू० पी०—७७ एस० सी० ई०—१६५१—५० ०००
007641

Indira Gandhi National Centre for the Arts

इदं पुस्तकं लक्ष्मीनाथभटस्य

बौधायनोक्त
नागबलि:

Indira Gandhi National
Centre for the Arts

॥श्रीगणेशाय नमः॥ अथातोऽनंतादिनागानां सर्पसंस्कारविधिं व्याख्यास्यामो दक्षिणोत्तरयोरमावास्यां पौर्णमास्यां
वा पंचम्यां वा॥ आश्लेषानक्षत्रे प्रक्रियते। पूर्वेद्युः सचैलं स्नापवासं कृत्वा परेद्युः वपनादिकं कृत्वा॥ अद्यश्चोदे
शे गोमयेनोपलिप्य॥ प्रस्थद्वयपरिमितेन प्रियंगुव्रीहिगोधूमतिलापिष्टेन वा सर्पाकृतिं तिलेन वा सर्पाकृतिं इदंन द ४
व शूर्पे निधाय। अनंताय काद्रवेयगोत्राय प्राणप्रतिष्ठापनं करिष्ये॥ ॥इति संकल्प्य॥ ॐ तत्पितृनं चित्के
तु विद्वान्यत्नस्ततः पुनरस्त्वेति जीवातु॥ त्रिरुद्यद्भुतनभ्रंतरे वपुः॥ जीवो गर्भेन सूतः सजावा। इत्यनेनैव
प्राणप्रतिष्ठापनं कृत्वा॥ भुजंगेशाय विद्महे सर्पराजाय धीमहि॥ तन्नो नागः प्रचोदयात्॥ इत्यभिमंत्र्य राम
॥अस्तुनीतेति तिसृचा हृदयेनाभिमंत्र्य। व्याहृत्यादि पंचगव्येन स्नापयित्वा॥ आपो हिष्ठेति तिसृभिः वचनेन प्रोक्ष्य १



॥नमो अस्तु सर्पेभ्य इति तिसृभिः नारांसं स्पृष्टं जपित्वा गायत्र्याभिषिंचति॥ गंधाक्षतादिभिरभ्यर्च्य नववस्त्रेण परिवेष्ट
यित्वा तत्रैकाग्रमना भावयेत्॥ वेदविद्ब्राह्मणानाहूय ब्रह्मदंडं धृत्वा। मम सर्वेषां निह जन्मनि जन्मांतरे वा ज्ञाना
ज्ञानेन वा कायिकवाचिकवाङ्मनस्कृतः श्रोत्रियनागहननदोषनिर्हरणार्थं शरीरपीडापरिहारार्थं पुत्र
पौत्राद्यभिवृद्ध्यर्थं दारिद्र्यपीडापरिहारार्थं मनेप्सितकामनासिद्ध्यर्थं कल्पोक्तप्रकारेण नागकार्यं करि
ष्ये॥ तत्प्रायश्चित्तं विधीयतामिति ब्रूयात्॥ वधं प्रख्यापयेत् प्राशी कृच्छ्रं चरेच्चतुर्दश। दद्यात्पापविशु
द्ध्यर्थं श्रोत्रियाय कुटुंबिने॥ अथ लोहदंडप्रायश्चित्तं॥ अथ सुवर्णमौल्येन कृच्छ्रत्रयं कृत्वा॥ साक्षाद्व
कर्तुरेव प्रदापयेत्। निष्कत्रयं द्विनिष्कं वा निष्कमेकं कनीयसं॥ अनुमत्या निष्कमेतदर्धकं। विप्र ध २



Indira Gandhi National Centre for the Arts

मउ

शादेन कुर्वीत दद्याद्विजानुसारतः॥ ब्राह्मणेभ्यो दक्षिणां दत्वा कृतप्रायश्चित्तोस्मीति भवंतो ब्रुवंतु
ति विर्वाचयित्वा॥ लौकिकाग्निमुपसमाधाय प्राणानायम्य इह जन्मनि जन्मांतरे वा मया नागापरा
धेन पीडाकरेण मे समस्तनागपीडानिवृत्तिनागद्वारा नागस्योत्तमलोकप्राप्त्यर्थं नागयोग्यतासिद्ध्य
र्थं अनंताय काश्यपगोत्राय नागसंस्कारं करिष्ये॥ इति संकल्प्य विधिवत्स्थंडिलं कृत्वाग्निं प्रतिष्ठाप्य त
दंगमन्वाधानं करिष्ये॥ इत्यादि वक्ष्यमाणो आज्येन अग्निं वायुं सूर्यं प्रजापतिं चतुर्गृहीतमाज्येन नागशरी
रं हविः संप्रोक्षयेत्॥ ॥भूर्भुवस्वः स्वाहा प्रजापतय इदं न मम ततो भस्मछिद्रं कृत्वा॥ ततोग्निमग्नेरुदि राम
ग्भागे गृह्योपदमित्युक्तेन भूमिं संप्रोक्ष्य चितिं कृत्वा तत्र संस्तीर्य कुशैराग्नेयवायव्याग्रैरग्निं परिस्तीर्य २

व १

परिषिंचयार्चयेत् ततः आज्यं संस्कृत्य स्रुवसंमार्जनं कृत्वा ततश्च स्रुवं स्रुचं च चतुर्गृहीतमाज्यं गृहीत्वा व्याह
तिभिर्हुत्वा। नमो अस्तु सर्पेभ्य इति तिसृभिर्हुत्वा सर्पेभ्यः स्वाहा॥ अनंताय स्वाहा॥ आश्लेषाभ्यां स्वाहा॥ क
पिलाय स्वाहा॥ नागाय कलिंगाय शंखपालाय भूधराय तत आयंगौरिति मंत्रेण सर्पचितिं च प्रोक्ष्य क्रव्याद
ग्निंमनुसर्पगायत्र्या वा अनंताय काश्यपगोत्राय शायिने प्रतिष्ठ चितिं अग्निं दत्वा स्रुवेण जुहुयात्॥ आज्यं व्या ह ४
स्रु २ हृतिभिः स्विष्टकृद्भिः सर्पायैं जुहुयात्॥ आज्यं व्याहृत्या च समंत्रं आज्यशेषं स्रुवेणैव सर्पदेहे निषिंचेत्॥ तत
ः सर्पेभ्यः स्वाहा॥ आश्लेषाभ्यः इदं तक्षकेभ्यः स्वाहा। सर्पशरीरस्योपरि जुहुयात्॥ ततः सर्पगायत्र्या जपेत्
उदकुंभमादाय त्रिः प्रदक्षिणं कृत्वा चितौ शांतो विधाय॥ यज्ञपात्राणि बर्हिषा। नमो अस्तु सर्पेभ्य इति श

Indira Gandhi National
Centre for the Arts.

थेनं॥ छतंगशापविद्महे सर्पराजाधीमहि॥ तत्रः सर्पःप्रचोदयात्॥ ज्ञानतोऽज्ञानतो वापि कृतः सर्पवधो
मघा॥ संस्कारं कुर्वतो भक्त्या मम दोषा विमुच्यते॥ ॥इति सर्पप्रार्थना॥ ॥नागशरीरं सुतरां दाहयित्वा॥
ततस्तद्भस्म सोदकेनाग्निं [illegible] इत्यादिभिः प्रोक्ष्य॥ तद्भस्म उदके प्रक्षिप्य। तत्र वेदिकां कृत्वा तस्यां तिस्रः शिला
प्रतिष्ठाप्य॥ अंजनाभ्यंजनस्नानवस्त्रयज्ञोपवीतगंधाक्षतैरभ्यर्च्य॥ ततो दक्षिणाग्रान् दर्भानास्तीर्य॥ अनं
तायकाश्यपगोत्राय एतत्तिलोदकं ददामि दर्भोपरि त्रीनुदकांजलीन्दद्यात्॥ अनंतरं त्रीन् पिंडान् कृत्वा
पिंडोपरि तिलोदकं दत्वा॥ चणकतंडुलनैवेद्यं दत्वा यथाशक्ति चतुर्विधप्रायश्चित्तं दद्यात्॥ यस्यस्म राम
त्यादि जप्त्वा॥ शुद्धस्नानं कृत्वा दशपरिधाय गृहमागत्य ब्रह्मचर्यादिकं कार्यं त्रिरात्रमिति निश्चयः॥ च ३



तुर्थेहनि संप्राप्ते सचैलं स्नानमाचरेत्॥ पुण्याहवाचनं कृत्वा अष्टौ ब्राह्मणानाहूय सर्पनाम्नाभिमं
त्र्यं गंधपुष्पाक्षतधूपदीपाच्छादनैरभ्यर्च्य मंत्रैः समंत्रैश्च तोषयेत्॥ विप्रान्भोजयेत्॥ यथाशक्ति दक्षि
णां दद्यात्॥ एवं कृते विधानेन सर्पसंस्कारकर्मणि॥ सर्पहिंसाकृतापीडा मुच्यते नात्र संशयः॥ कुष्ठव्या
५४ धिविनिर्मुक्तः सर्वथा मेंगादिभिः॥ आयुरारोग्यमैश्वर्यं प्राप्नुते नात्र संशयः॥ नागः प्रीयतामित्याशि सर्प२
षो वाचयित्वा॥ एवं कृते नागपीडापरिहारो भविष्यति॥ इत्याह भगवान्बौधायनः॥ इति संस्कारवि
धिः समाप्तः॥ ॥सर्पानंतस्तथा शेषः कपिलो नाग एव च॥ कलिंगं शंखपालश्च भूधरश्च प्रकीर्ति राम
तः॥ ॥शुभं भवतु॥ ॥ श्री कृष्णाय नमो नमः॥ श्रीः ४

Indira Gandhi National
Centre for the Arts